শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীপুণ্ডরীক কৃতম্

# ॥ শ্রী তুলসীস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী তুলসীস্তোত্রম্ ॥

জগদ্ধাত্রি নমস্তুভ্যং ৱিষ্ণোশ্চ প্রিযৱল্লভে।
যতো ব্রহ্মাদযো দেৱাঃ সৃষ্টিস্থিত্যন্তকারিণঃ॥ 1 ॥

নমস্তুলসি কল্যাণি নমো ৱিষ্ণুপ্রিযে শুভে।
নমো মোক্ষপ্রদে দেৱি নমঃ সম্পৎপ্রদাযিকে॥ 2 ॥

তুলসী পাতু মাং নিত্যং সর্ৱাপদ্ভ্যোঽপি সর্ৱদা।
কীর্তিতাঽপি স্মৃতা ৱাঽপি পৱিত্রযতি মানৱম্॥ 3 ॥

নমামি শিরসা দেৱীং তুলসীং ৱিলসত্তনুম্।
যাং দৃষ্টৱা পাপিনো মর্ত্যা মুচ্যন্তে সর্ৱকিল্বিষাৎ॥ 4 ॥

তুলস্যা রক্ষিতং সর্ৱং জগদেতচ্চরাচরম্।
যা ৱিনির্হন্তি পাপানি দৃষ্টৱা ৱা পাপিভির্নরৈঃ॥ 5 ॥

নমস্তুলস্যতিতরাং যস্যৈ বদ্ধ্ৱাঽঞ্জলিং কলৌ।
কলযন্তি সুখং সর্ৱং স্ত্রিযো ৱৈশ্যাস্তথাঽপরে॥ 6 ॥

তুলস্যা নাপরং কিঞ্চিদ্ দৈৱতং জগতীতলে।
যথা পৱিত্রিতো লোকো ৱিষ্ণুসঙ্গেন ৱৈষ্ণৱঃ॥ 7 ॥

তুলস্যাঃ পল্লৱং ৱিষ্ণোঃ শিরস্যারোপিতং কলৌ।
আরোপযতি সর্ৱাণি শ্রেযাংসি ৱরমস্তকে॥ 8 ॥

তুলস্যাং সকলা দেৱা ৱসন্তি সততং যতঃ।
অতস্তামর্চযেল্লোকে সর্ৱান্ দেৱান্ সমর্চযন্॥ 9 ॥

নমস্তুলসি সর্ব্বজ্ঞে পুরুষোত্তমৱল্লভে।
পাহি মাং সর্ব্বপাপেভ্যঃ সর্ব্বসম্পৎপ্রদাযিকে॥ **10** ॥

ইতি স্তোত্রং পুরা গীতং পুণ্ডরীকেণ ধীমতা।
ৱিষ্ণুমর্চযতা নিত্যং শোভনৈস্তুলসীদলৈঃ॥ **11** ॥

তুলসী শ্রীর্মহালক্ষ্মীর্ৱিদ্যাঽৱিদ্যা যশস্ৱিনী।
ধর্ম্যা ধর্মাননা দেৱী দেৱীদেৱমনঃপ্রিযা॥ **12** ॥

লক্ষ্মীপ্রিযসখী দেৱী দ্যৌর্ভূমিরচলা চলা।
ষোডশৈতানি নামানি তুলস্যাঃ কীর্তযন্নরঃ॥ **13** ॥

লভতে সুতরাং ভক্তিমন্তে ৱিষ্ণুপদং লভেৎ।
তুলসী ভূর্মহালক্ষ্মীঃ পদ্মিনী শ্রীর্হরিপ্রিযা॥ **14** ॥

তুলসি শ্রীসখি শুভে পাপহারিণি পুণ্যদে।
নমস্তে নারদনুতে নারাযণমনঃপ্রিযে॥ **15** ॥

॥ ইতি শ্রী তুলসীস্তোত্রং সমাপ্তম্ ॥